**आकाशवाणी**

**दिनाङ्क :-17.08.2025** **प्रातः - 06:55**

**प्रधानमन्त्री-दिल्लीपरियोजनाः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां प्रायः एकादश-सहस्रकोटिरूप्यकाणां द्वयोः राष्ट्रियराजमार्ग-परियोजनयोः उद्घाटनं करिष्यति। एतयोः परियोजनयोः द्वारका-एक्स्प्रेसवे-दिल्लीखण्डः, सहैव नगरीय-विस्तार-मार्गस्य द्वितीयः भागः इत्येतौ सम्मिलितौ स्तः । प्रधानमन्त्री-कार्यालयेन एकस्मिन् वक्तव्ये उक्तं यत् एताः परियोजनाः राजधान्यां जनसम्मर्दस्य अपचयार्थं सहैव यातायातसौविध्याय च विकासिताः सन्ति। एतासां उद्देश्यं तावत् दिल्ल्याः पार्श्ववर्तिक्षेत्रेषु यातायातसौख्यम्, सहैव यात्रायां समयपरिरक्षणम्, यातायातावरोधस्य च समाधानम् इत्येतानि सन्ति। अस्मिन् अवसरे प्रधानमन्त्री एकां जनसभाम् अपि सम्बोधयिष्यति।

**अन्तरिक्षयात्री शुक्ला- पुनरागमनम्**

भारतस्य अन्तरिक्षनायकस्य दलनायकस्य च शुभांशु-शुक्लस्य अद्य प्रातःकाले दिल्ली-अन्तारांष्ट्रियविमानस्थानके हार्दिकं स्वागतम् अभवत्। विमानस्थानके केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः, दिल्ल्याः मुख्यमन्त्री रेखागुप्ता, इसरो-अध्यक्षः डॉ. वी.नारायणन् च तस्य स्वागतं कृतवन्तः । तस्य स्वागताय तस्य पत्नी पुत्रः अपि उपस्थितौ आस्ताम् । अवधेयं वर्तते यत् अन्तारांष्ट्रिय-अन्तरिक्ष-स्थानकस्य (ISS) इत्यस्य: भ्रमणं कृत्वा प्रथमः भारतीयत्वेन इतिहासं रचयित्वा शुभांशु-शुक्लः स्वस्य अभूतपूर्व अभियानस्य अनन्तरं शारीरिक-स्वास्थ्याय अमेरिका-देशे पुनर्वासे आसीत्।

**भाजपा- संसदीय उपवर्शनम्**

अद्य नवदिल्ल्यां भारतीय-जनता-पार्टीति दलस्य मुख्यालये उपराष्ट्रपति-निर्वाचनाय प्रत्याशी चयनाय भाजपा-संसदीय दलस्य उपवेशनं भवितुं शक्नोति। दलस्य सर्वे संसदीय-सदस्याः सभायां उपस्थिताः भविष्यन्ति। अस्य मासस्य षष्ठे दिनाङ्के राष्ट्रियलोकतांत्रिकगठबन्धनस्य नेतारः सर्वसम्मत्या प्रधानमन्त्रिणं नरेन्द्रमोदिनं भाजपा-अध्यक्षं जगतप्रकाशनड्डा इत्यमुं च उपराष्ट्रपतिनिर्वाचनाय एनडीए-पक्षस्य प्रत्याशि-पदाय सदस्यम् अन्तिमरूपेण निर्धारयितुं अधिकारः प्रदत्तवन्तः।

**भारत-ट्रम्प-पुतिनः**

भारतेन अलास्कायां अमेरिकी राष्ट्रपतिनः डोनाल्डट्रम्पस्य रूसस्य राष्ट्रपतिनः व्लादिमीर-पुतिन इत्युभयोः मध्ये सम्पन्नस्य शिखरसम्मेलनस्य स्वागतं कृतम्। एकस्मिन् वक्तव्ये भारतस्य विदेशमन्त्रालयेन शान्तिवार्तायाः प्रशंसां कृता सहैव प्रोक्तं यत् संवादः कूटनीतिश्च समुदयस्य मार्गं प्रशस्तीकुरुतः। मन्त्रालयेन अग्रे कथितं यत् विश्वेन यूक्रेनसङ्घर्षस्य विरामः आकाङ्क्ष्यते। अमेरिकी-राष्ट्रपतिना परामृष्टं यत् रुसयूक्रेनदेशौ युद्धसमापनाय सन्धिविषये विचारयेताम्। शुक्रवासरे अलास्कयां व्लादिमीर-पुतिन इत्यमुना सह घण्टात्रयात्मकं उपवेशनं विधाय डोनाल्ड-ट्रम्पः एतत् प्रख्यापितवान्। यूक्रेनस्य राष्ट्रपतिना वोलोदिमीर-जेलेंस्की इत्येषः प्रोक्तवान् यत् सः सोमवासरे वाशिंगटननगरे ट्रम्पेन सह मिलिष्यति।

**जयशङ्करः-दक्षिणकोरियाविदशमन्त्री**

विदेशमन्त्री डॉ. एस. जयशङ्करः ह्यः नवदिल्ल्यां दक्षिणकोरियायाः स्वकीयेन समकक्षेण चो ह्यून इत्यमुना सह द्विपक्षीयोपवेशनं साधितवान् ।अस्य वर्षस्य एप्रिलमासे पहलगामे दुरापन्नस्य आतङ्कवादाक्रमणस्य दक्षिणकोरियापक्षतः कृतनिन्दासन्दर्भे विदेशमन्त्रिणा डा. एस. जयशङ्करेण तत्रत्य विदेशमन्त्रिणे चो ह्यून इत्यस्मै कार्तज्ञं प्रकटितम्। ह्यः नवदिल्ल्यां श्रीह्यून इत्यमुना सहोपवेशने डॉ. जयशङ्करः कोरियायाः राष्ट्रियमुक्तिदिवसमालक्ष्य उद्घाटनभाषणे दक्षिणकोरियायाः विदेशमन्त्रिणे शुभकामनां प्राकल्पयत्। अवसरेऽस्मिन् तयोः मध्ये रक्षा-सुरक्षा-व्यापार-अर्थनीति-जनसम्बन्धाञ्च समेत्य बहवः विषयाः विचारिताः । मन्त्रिणा प्रोक्तं यत् तयोः मध्ये हिन्दप्रशान्तक्षेत्रयोः सहैव वर्तमान-वैश्विकघटनाक्रमानालक्ष्य विचार-विनिमयः समजायत।

**।।इति वार्ता:।।**